309sk14

# 14

# अमृतस्य पन्थाः

भवन्तः जानन्ति एव यत् जिज्ञासा मानवस्य सहजा प्रवृत्तिः। वयं किमपि वस्तु विषयं व्यक्तिं वा दृष्ट्वा तं प्रति जिज्ञासां कुर्मः। अद्यत्वे तु यथा यथा बालकाः बालिकाः च वयसा वृद्धिं प्राप्नुवन्ति तथा तथा स्वपर्यावरणस्य विषये तेषां तासां च जागरूकता प्रवर्धते। अतः विविधान् प्रश्नान् पृच्छन्ति। एतेषां प्रश्नानाम् उत्तराणि ज्येष्ठाः श्रेष्ठाः च जनाः स्वबुद्ध्यनुसारं वदन्ति। अस्माकं पूर्वजैः ऋषिभिः एतादृशानां बहूनां प्रश्नानाम् उत्तराणि उक्तानि। तानि अस्माकं समृद्धे साहित्ये उपलभ्यन्ते। वेदाः उपनिषदः च संस्कृतवाङ्मयस्य मूर्धन्याः ग्रंथाः। तत्र जिज्ञासानां शमनपूर्वकं समुचितरूपेण जीवनयापनस्य मार्गः प्रदर्शितः। सः मार्गः एव अमृतस्य पन्थाः अस्ति। अस्मिन् पाठे वयम् अमृतस्य मार्गस्य सम्बन्धे पठामः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- पाठगतानां मन्त्राणां शुद्धं सस्वरम् उच्चारणं कर्तुं क्षमः भविष्यति;
- तेषां मन्त्राणां संदर्भं लेखितुं शक्तः भविष्यति;
- तेषां मन्त्राणां भावं वक्तुं लेखितुं च शक्ष्यति;
- सूर्यस्य, समुद्रस्य, पृथिव्याः गोः च महत्त्वं लेखितुं समर्थः भविष्यति;
- पारिवारिकव्यवहारस्य स्वरूपं वर्णयितुं क्षमः भविष्यति;
- मन्त्रेषु निहितजीवनमूल्यानि अधिकृत्य सूक्तीनां चयनं कर्तुं शक्ष्यति;
- उपमेयैः सह उपमानानां मेलनं करिष्यति;
- ईयसुन्, इष्ठन् प्रत्यययोः प्रयोगं कर्तुं शक्ष्यति;
- ज्योतिष्, आत्मन्, राजन्, पति, मनस्, चन्द्रमस् शब्दरूपाणां चयनं करिष्यति;



टिप्पणी



## क्रियाकलापः




चित्रं दृष्ट्वा अधोलिखितप्रश्नानाम् उत्तरं ददतु

1. वेदानां विषयः .................. अस्ति।
2. वेदाः कति सन्ति .....................त्रयः चत्वारः वा?
3. वेदानां नामानि लिखत .................... .................... .................... ....................
4. ........................ ऋग्वेदस्य उपनिषद्।
5. प्रश्नोपनिषद् .................... वेदस्य उपनिषद्।
6. वेदेषु उपनिषत्सु प्रतिपादितानां केषाञ्चित् प×चजीवनमूल्यानां नामानि लिखन्तु।

   ...................................... ...................................... ......................................
   ...................................... ......................................

## 14.1 मूलपाठः

### अमृतस्य पन्थाः

इदानीं वेदेभ्यः उपनिषद्भ्यः च सङ्कलितान् मन्त्रान् पठामः।

किंस्वित्सूर्यसमं ज्योतिः, किं समुद्रसमं सरः।
किंस्वित्पृथिव्यै वर्षीयान्, कस्य मात्रा न विद्यते।।1।।

ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमं सरः।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते।।2।।

स नः पवस्व शं गवे, शं जनाय शमर्वते।
शं राजन्नोषधीभ्यः।।3।।

विश्वरूपं हरिणं जातवेदसं, परायणं ज्योतिरेकं तपन्तम्।
सहस्ररश्मिः शतधा वर्तमानः, प्राणः प्रजानामुदयत्येष सूर्यः।।4।।

आत्मानं रथिनं विद्धि शरीरं रथमेव तु
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।5।।

तिलेषु तैलं दधनीव सर्पिरापः स्रोतःस्वरणीषु चाग्निः।
एवमात्माऽत्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति।।6।।

अनुव्रतः पितुः पुत्रः मात्रा भवतु संमनाः
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्।।7।।

मा भ्राता भ्रातरं द्विक्षन्
मा स्वसारमुत स्वसा।
सम्यंचः सव्रता भूत्वा
वाचं वदत भद्रया।।8।।

**शब्दार्थाः**

किंस्वित् = किं स्वित् = क्या
सूर्यसमं = सूर्य के समान
सरः = तडागः, तालाब
वर्षीयः = अधिक वर्ष वाला, अधिक आयु का, मात्रा = समानता, उपमा
ब्रह्म = परमशक्ति रूप ईश्वर
द्यौः = द्यु लोक, गोः = गाय
जातवेदसम् = जिससे विज्ञान उत्पन्न होते हैं ऐसे सूर्य को
सहस्ररश्मिः = हजार किरणों वाला
शतधा = सैकड़ों प्रकार से
होता = आह्वान करने वाला, बुलाने वाला, पवस्व = शुद्ध हो
शं = कल्याण, शान्ति
अर्वते = घोड़े के लिए
आत्मानम् = आत्मा को
रथिनम् = रथ का स्वामी
विद्धि = जानो
सारथिम् = रथ चलाने वाले को
प्रग्रहम् = घोड़े की लगाम
दधनीव = दधनि + इव = जैसे दही में, सर्पिरापः = सर्पिः + आपः, सर्पिः = घी, आपः = जल
स्रोतःस्वरणीषु = स्त्रोतःसु + अरणीषु
स्त्रोतःसु = स्रोतों में, उद्गम स्थलों में, अनुव्रतः = अनुकूल काम करने वाला, मात्रा = माता से, के साथ
संमनाः = अच्छे मन वाला
जाया = पत्नी
मधुमतीं = मीठी वाणी को
शान्तिवाम् = शान्ति से युक्त
द्विक्षन् मा = द्विक्षत् + मा
द्विक्षत् = द्वेष करे
मा = मत, नहीं
सम्यंचः = समान व्रत वाले, समान कर्म वाले
भद्रया = उचित रीति से

## 14.2 बोधप्रश्नाः

1. मूलपाठं दृष्ट्वा रिक्तस्थानं पूरयन्तु
   (क) किं ...................................... ज्योतिः।
   (ख) गोस्तु ...................................... न विद्यते।



टिप्पणी

(ग) आत्मानं ...................................... विद्धि।

(घ) .....................................पितुः पुत्रः।

(ङ) वाचं वदतु ......................................।

2. 'अ' स्तम्भे लिखितानां प्रश्नानां 'ब' स्तम्भे लिखितैः उत्तरैः सहरेखया मेलनं कुर्वन्तु

| **'अ' प्रश्नाः** | **'ब' उत्तराणि** |
|---|---|
| (क) किं समुद्रसमं सरः? | (i) आपः स्रोतःसु भवन्ति। |
| (ख) मनः कीदृशम् विद्धि? | (ii) भद्रया वाचं वदत। |
| (ग) आपः कुत्र भवन्ति? | (iii) द्यौः समुद्रसमं सरः। |
| (घ) जाया पत्ये कीदृशीं वाचं वदतु? | (iv) मनः प्रग्रहमेव विद्धि। |
| (ङ) कया वाचं वदत? | (v) जाया पत्ये मधुमतीं वाचं वदतु। |

## 14.3 अधुना अवगच्छामः

### प्रथमः अंशः

किंस्वित्सूर्यसमं ज्योतिः,
किं समुद्रसमं सरः।
किंस्वित्पृथिव्यै वर्षीयान्,
कस्य मात्रा न विद्यते।।1।।

**मन्त्रः–1**

**पदच्छेदः** किम् स्वित् सूर्यसमम् ज्योतिः, किम् समुद्रसमम् सरः।
किम् स्वित् पृथिव्यै वर्षीयान्, कस्य मात्रा न विद्यते।।

**अन्वयः** सूर्यसमं ज्योतिः किंस्वित्? समुद्रसमं सरः किम्? पृथिव्यै वर्षीयः किंस्वित्? कस्य मात्रा न विद्यते?

**व्याख्या**

अत्र यजुर्वेदस्य प्रथममन्त्रे ऋषिः सृष्टिसम्बन्धे चतुरः प्रश्नान् पृच्छति–

अत्र कः प्रथमः प्रश्नः? किंस्विद् ज्योतिः (अस्ति)? केन समम्? सूर्यसमम् अर्थात् सर्वज्योतिषु सूर्यस्य ज्योतिः श्रेष्ठम्। किं सूर्यस्य ज्योतिषा सदृशम् अपि अन्यत् किमपि ज्योतिः?

द्वितीयः प्रश्नः कः? किं सरः अस्ति? केन समम्? समुद्रसमम् अर्थात् समुद्रेण सदृशः जलाशयः।

तृतीयः प्रश्नः कः? किंस्विद् वर्षीयः अस्ति? कस्यै वर्षीयान्? पृथिव्यै वर्षीयान् अर्थात् पृथिव्याः पूर्वं कः रचितः।

चतुर्थः प्रश्नः कः? कस्य मात्रा न विद्यते? कस्य तुलना न विद्यते।





**किंस्वित् सूर्यसमं ज्योतिः–** संसारे बहूनि ज्योतींषि भवन्ति, यथा दीपज्योतिः, अग्निज्योतिः, चन्द्रज्योतिः। एतेषु ज्योतिषु सूर्यज्योतिः प्रमुखं मन्यते। अत्र प्रश्नः भवति यत् सूर्यसमं ज्योतिः किम् अस्ति?

**किं समुद्रसमं सरः–** सरांसि अनेकविधानि भवन्ति। ग्रामे सरः यत्र जनाः स्नान्ति, जलं स्वगृहम् आनयन्ति, वने सरः भवति यत्र पशवः पक्षिणः च जलं पिबन्ति, नगरे सरः भवति यतः सर्वकारः यन्त्रद्वारा जलं नागरिकाणां गृहेषु प्रापयति। सरः = तडागः = पल्वलः। ऋषिः मनुते यत् समुद्रः अपि महत् सरः। अत्र प्रश्नः भवति यत् समुद्रसमं सरः किम् अस्ति?

**किंस्वित् पृथिव्यै वर्षीयान्–** पृथिवी अनेकेभ्यः वर्षेभ्यः पूर्वं रचिता। अतः पृथिवी वृद्धा। पृथिव्याः अपेक्षया वृद्धतरः कः? पृथिव्याः पूर्वं कः रचितः आसीत् अयम् अस्ति अत्र प्रश्नः? पृथिव्यै वर्षीयान् किंस्वित्?

**कस्य मात्रा न विद्यते–** संसारे प्रायः सर्वेषां वस्तूनां मानं विद्यते घनीभूतवस्तूनां तोलनं कृत्वा मानं ज्ञायते। तरलानां द्रव्याणां पात्रेण मानं क्रियते। वस्त्रादिकस्य अपि मानं ज्ञायते। अत्र प्रश्नः अस्ति–कस्य मानं न अस्ति? कस्य तुल्यता, तुलनीयता न भवति?

यहां वैदिक ऋषि चार प्रश्न पूछता है–

1. सूर्य के समान ज्योति कौन सी है?
2. समुद्र के समान लम्बा चौड़ा तालाब कौन सा है?
3. पृथिवी से अधिक पुराना कौन है?
4. किस की तुलना किसी दूसरी वस्तु से नहीं की जा सकती?

**मन्त्रः–2**

ब्रह्म सूर्यसमं ज्योति–
द्यौःसमुद्रसमं सरः।
इन्द्रः पृथिव्यै वर्षीयान्
गोस्तु मात्रा न विद्यते।।2।।

**पदच्छेदः** ब्रह्म सूर्यसमम् ज्योतिः द्यौः समुद्रसमम् सरः।
इन्द्रः पृथिव्यै वर्षीयान् गोः तु मात्रा न विद्यते।।

**अन्वयः** सूर्यसमं ज्योतिः ब्रह्म (अस्ति) समुद्रसमं सरः द्यौः (अस्ति)। पृथिव्यै वर्षीयान् इन्द्रः (अस्ति) गोः तु मात्रा न विद्यते।

**व्याख्या**

अस्मिन् मंत्रे पूर्वप्रश्नानां चत्वारि उत्तराणि अत्र प्रदत्तानि सन्ति। स्वयमपि विचारयन्तु यदि किमपि अन्यत् अपि उत्तरम् चेत्तर्हि लिखन्तु।

सूर्येण समं ज्योतिः किंस्वित्? सूर्येण समं ज्योतिः ब्रह्म (अस्ति)।

समुद्रसमं सरः किंस्वित्? द्यौः समुद्रसमम् सरः (अस्ति)।

पृथिव्यै वर्षीयान् कः? इन्द्रः पृथिव्यै वर्षीयान्।

कस्याः मात्रा न अस्ति? गोः तु मात्रा न अस्ति।

**ब्रह्म सूर्यसमं ज्योतिः–** यथा सूर्यज्योतिः अधिकं तेजोमयं भवति तथा एव ब्रह्म अपि अधिकं तेजोमयं भवति। ब्रह्म परमशक्तिमान् परमात्मा अस्ति। तस्य तेजः प्रबलं भवति।

**द्यौः समुद्रसमं सरः–** द्युलोकः तथा विस्तृतः गम्भीरः च वर्तते यथा समुद्रः विस्तृतः गम्भीरः च भवति। पृथिव्याः अधः पाताललोकः, पृथिव्याः उपरि अन्तरिक्षम् अन्तरिक्षस्य उपरि द्युलोकः। द्युलोकः अति विस्तृतः भवति।

**इन्द्रः पृथिव्यै वर्षीयान्–** वर्षीयान्–अनयोः वृद्धयोः मध्ये अतिशयेन अयं वृद्धः इति वर्षीयान्। वृद्धस्य वर्ष इति आदेशः। इन्द्रः देवानां राजा। इन्द्रः वृष्टेः (वर्षायाः) कर्ता। इन्द्रः पृथिव्याः पूर्वं रचितः। अतः इन्द्रः पृथिव्याः वृद्धतरः अस्ति।

**गोस्तु मात्रा न विद्यते–** गोः तु मात्रा न विद्यते। गोः तुलना केन अपि कर्तुं न शक्यते। गौः भारतीयसंस्कृतौ पूज्या अस्ति। गौः मात्रा सदृशी भवति। असौ नीरुजं दुग्धं ददाति। तस्या पुत्राः बलीवर्दाः कृषिकर्म कुर्वन्ति। अतः गौः अतुलनीया भवति।

(प्रथम मन्त्र में पूछे गए प्रश्नों का उत्तर द्वितीय मन्त्र में दिया गया है। प्रथम मन्त्र में चार प्रश्न पूछे गए थे उन चारों का उत्तर इस दूसरे मन्त्र में दिया गया है–

1. सूर्य के समान प्रकाशवान तेजोमय ब्रह्म है। ब्रह्म सर्वशक्तिमान परमपिता परमात्मा को कहते हैं।
2. समुद्र के समान लम्बा, चौड़ा और गहरा द्युलोक है। पृथिवी, पृथिवी के नीचे पाताल लोक, पृथिवी के ऊपर अन्तरिक्ष है और अन्तरिक्ष से ऊपर द्युलोक।
3. पृथिवी से पहले इन्द्र की सृष्टि हुई थी। इसलिए इन्द्र पृथिवी से बड़ी आयु वाला है। इन्द्र पृथिवी से भी पुराना है।
4. गौ की बराबरी किसी से नहीं की जा सकती। गौ अतुलनीय है। गौ हमारे लिए पूज्य है।

**मन्त्रः–3**

स नः पवस्व शं गवे, शं जनाय शमर्वते।
शं राजन्नोषधीभ्यः।।3।।

**पदच्छेदः** सः नः पवस्व शम् गवे, शम् जनाय शम् अर्वते।
शम् राजन् नः ओषधिभ्यः।।

**अन्वयः** राजन् स (त्वं) नः गवे शं (कुरु), (नः) जनाय शं (कुरु), (नः) अर्वते शं (कुरु) ओषधीभ्यः शं (कुरु), पवस्व।

**व्याख्या**

सामवेदस्य अस्मिन् तृतीये मंत्रे ऋषिः सोमं किं प्रार्थयति इति बोधामः।

राजन् सः त्वं किं कुरु? 1. नः गवे शम् (कुरु)। 2. जनाय शम् (कुरु)। 3. (नः) अर्वते शम् (कुरु)। 4. (नः) ओषधीभ्यः शम् कुरु। 5.पवस्व।

अयं मन्त्रः सामवेदस्य अस्ति। सोमः ओषधिमयः रसः भवति। सः देवतावत् प्रार्थितः।

**स नः पवस्व शं गवे**– नः = अस्माकं गवे = पशवे।

अत्र एकवचनं जात्यर्थे प्रयुक्तः। अतः गोभ्यः = पशुभ्यः, अयम् अर्थः ग्रहीतव्यः। शं भवतु = कल्याणं, सुखं शान्तिः भवतु। हे सोम! त्वं स्वयं पवस्व पुनीतः पवित्रः भव।

**शं जनाय** – शं = कल्याणं, मंगलं, शान्तिः, (भवतु) जनाय = अस्माकं बन्धवे। अत्रापि जात्यर्थे एकवचनं प्रयुक्तम्। जनेभ्यः = बन्धुभ्यः अयमर्थः ग्रहीतव्यः।

**शम् अर्वते** – अर्वते, अश्वाय। अस्माकं अश्वेभ्यः कल्याणं भवतु पवस्व – हे सोम त्वं वस्त्रादिद्वारा विशुद्धः भव।

तीसरे मन्त्र में ऋषि सोम से प्रार्थना करता है कि हे सोम! तुम हमारे पशुओं का कल्याण करो, हमारे बन्धु बान्धवों का कल्याण करो और हमारी औषधियों को कल्याणकारी बनाओ। हे सोम तुम स्वयं वस्त्र आदि में छाने जा कर शुद्ध हो जिससे तुम्हें पीकर लोग स्वस्थ हों।

## व्याकरणबिन्दवः

किंस्वित् = किम् + स्वित् (अव्ययः)
सूर्यसमम् = सूर्येण समम् (तृतीयातत्पुरुषसमासः)
समुद्रसमम् = समुद्रेण समम् (तृतीयातत्पुरुषसमासः)
वर्षीयान् = वृद्ध + इयसुन् (प्रत्ययः) वृद्धस्य 'वर्ष' इत्यादेशः
राजन्नोषधीभ्यः = राजन् + ओषधीभ्यः (व्यंजनसन्धिः) स्वरपरे सति 'न्' वर्णस्य द्वित्वं भवति।

## पर्यायवाचिनः

समुद्रः – सागरः, उदधिः, वारिधिः, नीरनिधिः, जलधिः।

सूर्यः– दिवाकरः, दिनमणिः, सहस्ररश्मिः, सहस्रकरः, सहस्रकिरणः, सहस्रदीधितिः, सहस्रमरीचिः, सहस्रधाम, सहस्रपाद, सहस्रांशुः, सहस्रार्चिः, तिग्मदीधितिः।

## पाठगतप्रश्नाः 14.1

1. दत्तानाम् उत्तराणां प्रश्नान् लिखन्तु

(क) गोः मात्रा न विद्यते। ..........................................

(ख) समुद्रसमं सरः द्यौः अस्ति। ..........................................

(ग) इन्द्रः पृथिव्यै वर्षीयान्। ..........................................

(घ) सूर्यसमं ज्योतिः ब्रह्म अस्ति। ..........................................





2. उत्तराणि संस्कृतेन लिखत
   (क) ब्रह्मविदः सूर्यं कीदृशं ज्ञातवन्तः? ..........................................................................
   (ख) अर्वते इति शब्दस्य कः अर्थः? ..........................................................................
   (ग) सोमः कस्मै कस्मै कल्याणं करोति?..........................................................................
   (घ) पृथिव्यै वर्षीयान् कः? ..........................................................................
   (ङ) अस्माकम् इति कस्य पदस्य अर्थः?..........................................................................

3. ईयसुन्, इष्ठन् प्रत्यययोः प्रयोगं कृत्वा रिक्तस्थाने लिखत

| | प्रकृतिः (आदेश) | ईयसुन् | इष्ठन् |
|---|---|---|---|
| (क) | प्रियः (प्र) | ............... | प्रेष्ठः |
| (ख) | प्रशस्यः (श्र) | श्रेयान् | ............... |
| (ग) | वरः | .............. | वरिष्ठः |
| (घ) | अन्तिकम् (नेद्) | नेदीयान् | ................. |
| (ङ) | अल्पः (कन्) | कनीयान् | .................... |

## द्वितीयः अंशः

**मन्त्रः–4**

विश्वरूपं हरिणं जातवेदसं,
परायणं ज्योतिरेकं तपन्तम्।
सहस्ररश्मिः शतधा वर्तमानः,
प्राणः प्रजानामुदयत्येष सूर्यः।।4।।

प्रश्नोपनिषदः अस्मिन् मंत्रे सूर्यस्य स्वरूपं बोधामः।

**पदच्छेदः** विश्वरूपम् हरिणम् जातवेदसम्, परायणम् ज्योतिः एकम् तपन्तम्।
सहस्ररश्मिः शतधा वर्तमानः, प्राणः प्रजानाम् उदयति एषः सूर्यः।।

**अन्वयः** विश्वरूपम्, हरिणम्, जातवेदसम्, परायणम्, ज्योतिः,एवम्, तपन्तम् (सूर्यं ब्रह्मविदः विद्वांसः ज्ञातवन्तः)। (स) सहस्ररश्मिः शतधा वर्तमानः प्रजानाम् प्राणः सूर्यः उदयति एव।

**खण्डान्वयः**

ब्रह्मविदः विद्वांसः किं ज्ञातवन्तः? सूर्यं ज्ञातवन्तः। कीदृशं सूर्यम्? विश्वरूपम्। पुनः कीदृशम्? हरिणम्। पुनः कीदृशम्? जातवेदसम्। पुनः कीदृशम्? ज्योतिः। पुनः कीदृशम्? एकम्। पुनः कीदृशम्? तपन्तम्। कः उदयति? सूर्यः उदयति एव। कीदृशः सूर्यः उदयति? सहस्ररश्मिः, शतधा वर्तमानः, प्राणः। केषां प्राणः? प्रजानां प्राणः।

**व्याख्या**

अत्र भवद्भिः सूर्यस्य स्वरूपविषये पठितम्। भवन्तः अपि स्वमत्या काश्चन् चतस्रः विशेषताः लिखन्तु।







पिप्पलादस्य ऋषेः शिष्याः तम् अनेकान् प्रश्नान् अपृच्छन्। तत्र कात्यायनः सृष्टेः विषये अपृच्छत्। तस्य प्रश्नस्य उत्तरं कथयन् पिप्पलादः ऋषिः सूर्यस्य उत्पत्तिविषये स्वरूपविषये च अवदत्।

**विश्वरूपम्**— सर्वरूपम्। विश्वेषां जनानां रूपं सूर्यः। सर्वान् जनान् स्वप्रकाशेन दर्शयति, तेभ्यः रूपं ददाति। अन्धकारे कस्य अपि रूपं दृष्टं न भवति। प्रकाशे एवं रूपं दृष्टिगोचरं भवति। अतः सूर्यः सर्वेषां रूपम् अस्ति।

**हरिणम्**— हरति इति हरिणः। सूर्यः सर्वम् अन्धकारं हरति, रोगान् हरति, जलं वाष्परूपेण हरति येन वर्षाः वर्षन्ति। अतः सूर्यः हरिणः तं हरिणम्।

**जातवेदसम्**— जातानि वेत्ति इति जातवेदः तं जातवेदसम्। सर्वान् उत्पन्नान् सूर्यः जानाति। अथवा जातानि वेदांसि विज्ञानानि यस्मात् स जातवेदः। सूर्य एवं सर्वेषां विज्ञानानां कारणम् अतः असौ जातवेदः तं जातवेदसम्।

**परायणम्**— पर + अयनम्। परेषाम् अयनम् आश्रयभूतम् सूर्यम्।

**ज्योतिः** — ज्योतिस्वरूपम्, तेजोमयम्।

**एकम्**— एकाकिनम्, एकलं, सूर्यः एकाकी एव आकाशे भ्रमति। स कस्य अपि साहाय्यं न अपेक्षते।

**तपन्तम्**— तापं कुर्वन्तम्। सूर्यः महान् अग्निगोलकः, तस्य तापः एव ऊर्जायाः स्रोतः। सूर्यः सृष्टेः महान् स्तम्भः। सूर्यः चेत् न स्यात् सृष्टिः नश्येत्।

एतादृशं सूर्यं ब्रह्मविदः विज्ञातवन्तः।

**सहस्ररश्मिः**— सहस्रं रश्मयः यस्य सः, अनेककिरणवान् सूर्यः।

**शतधा वर्तमानः**— अनेकैः प्रकारैः विद्यमानः। सर्वेषु प्राणिषु, वृक्षेषु, वस्तुषु च सूर्यस्य उष्मा विद्यते। अतः सूर्यः तेषां रूपेण विद्यमानः भवति।

**प्रजानां प्राणः**— सूर्यः यदि न स्यात् तदा जनाः म्रियेरन्। अत एव उक्तम् — प्रजानां प्राणभूतः जीवनस्य आधारः, जीवनस्य रक्षकः।

**मन्त्रः—5**

अस्मिन् मंत्रे वयम् रथस्वरूपं शरीरं बोधामः।

आत्मानं रथिनं विद्धि शरीरं रथमेव तु
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।5।।

**पदच्छेदः** आत्मानम् रथिनम् विद्धि शरीरम् रथम् एव तु।
बुद्धिम् तु सारथिम् विद्धि मनः प्रग्रहम् एव च।।





**अन्वयः** आत्मानम् रथिनम् विद्धि, शरीरम् तु रथम् एव च बुद्धिम् तु सारथिम् विद्धि, मनः च प्रग्रहम् एव (विद्धि)।

**व्याख्याः**

ऋषिः जिज्ञासां शाम्यति–

आत्मानं किं विद्धि? आत्मानं रथिनम्, शरीरं तु रथम् एव, बुद्धिं तु सारथिं, मनः च प्रग्रहम् एव जानीहि।

आत्मानं रथिनं .......................... इति मन्त्रः कठोपनिषदः वर्तते।

**आत्मानं रथिनं विद्धि, शरीरं रथम् एव तु–** यथा रथः भवति तथा शरीरं जानीहि। शरीरं रथसदृशः। रथस्य स्वामी रथी कथ्यते। शरीरस्य स्वामी आत्मा अस्ति।

**बुद्धिं तु सारथिं विद्धि–** रथस्य चालकः सारथिः कथ्यते। सारथिः कुशलः भवति चेत् रथं सम्यक् चालयति, अकुशलः भवति चेत् रथं सम्यक् न चालयति। रथस्य चालकः सारथिः, शरीरस्य चालिका बुद्धिः। बुद्धिः निर्णयं करोति शरीरं कथं चालयितव्यम्।

**मनः प्रग्रहमेव च–** रथस्य कर्षणम् अश्वाः कुर्वन्ति एवम् इन्द्रियाणि शरीरम् इतः ततः आकर्षन्ति। अश्वानां प्रग्रहाः तान् नियन्त्रयन्ति। एवम् एव मनः शरीरस्य प्रग्रहः। मनः इन्द्रियाणि। तद्द्वारा शरीरं सन्मार्गे स्थापयति। आत्मा मनसः नियन्त्रणेन शरीरं सम्यक् चालयति।

**मन्त्रः–6**

अस्मिन् मन्त्रे वयं आत्मनः ज्ञानं कथं भवेत् इति बोधामः।

तिलेषु तैलं दधनीव सर्पिरापः
स्रोतःस्वरणीषु चाग्निः।
एवमात्माऽत्मनि गृह्यतेऽसौ
सत्येनैनंतपसा योऽनुपश्यति।।6।।

**पदच्छेदः** तिलेषु तैलम् दधनि इव सर्पिः आपः स्रोतःसु अरणीषु च अग्निः
एवम् आत्मा आत्मनि गृह्यते असौ सत्येन एनम् तपसा यः अनुपश्यति।।

**अन्वयः** यः असौ सत्येन तपसा एनम् (आत्मानम्) अनुपश्यति तेन आत्मनि आत्मा (तथा) गृह्यते (यथा) तिलेषु तैलम् (गृह्यते) दधनि सर्पिः (गृह्यते) स्रोतःसु आपः (गृह्यते) अरणीषु च अग्निः गृह्यते।

**व्याख्या**

यः कम् अनुपश्यति? आत्मा एवम् (आत्मानम्) अनुपश्यति।

एनम् कथम् अनुपश्यति? सत्येन तपसा। तेन आत्मा आत्मनि गृह्यते।

कथं गृह्यते? यथा– 1. तिलेषु तैलं भवति। 2. दधनि सर्पिः इव। 3. स्रोतःसु आपः इव। 4. अरणीषु अग्निः इव।

अयं मन्त्रः श्वेताश्वतरोपनिषदः गृहीतः।

**तिलेषु तैलं ................ चाग्निः।** यथा तिलेषु तैलं भवति, बहिः न दृश्यते, यथा दधनि सर्पिः– घृतम् अन्तर्निहितं भवति, यथा आपः–जलं स्रोतःसु– उत्सेषु विद्यमानं भवति, यथा अरणीषु अग्निः – यज्ञसमये अग्नेः उत्पादनाय काष्ठविशेषस्य उपयोगः क्रियते तस्य काष्ठस्य नाम अरणी इति भवति। यज्ञारम्भे द्वयोः अरण्योः घर्षणेन अग्निः उत्पद्यते। असौ अग्निः अरण्योः एव भवति बहिस्तः न दृश्यते। परम् एतेषां तैल–घृत–जलानां प्रापणे अरणीभ्यः अग्नेः उत्पादने जनेन श्रमः करणीयः भवति।

**एवमात्मानि ....................................... योऽनुपश्यति।**

यथा तिलादिषु तैलादिकं प्राप्तुं श्रमः कर्तव्यः भवति तथा एव असौ आत्मा आत्मनि एव गृह्यते–प्राप्यते। केन गृह्यते? यः एनम् आत्मानं सत्येन तपसा च अनुपश्यति यः जनः सदा सत्यं वदति तपसा–परिश्रमेण च व्यवहरति स एव आत्मनि आत्मानं जानाति।

सूर्य ही सारे विश्व का रूप है। सूर्य ही सबका आश्रय है। यह शरीर एक रथ के समान है। रथ रूपी शरीर का स्वामी आत्मा है। बुद्धि सारथी है। इन्द्रियां रथ को खींचने वाले घोड़े हैं। मन लगाम है। इस प्रकार मन के नियन्त्रण से शरीर भली भांति चल पाता है। जो व्यक्ति इस आत्मा को सत्य और तप से देखते हैं वे ही आत्मा को जान सकते हैं।

## व्याकरणबिन्दवः

**पदपरिचयः**

| | | | |
|---|---|---|---|
| आत्मानम् | – आत्मन्, | द्वितीया | एकवचनम् |
| रथिनम् | – रथः अस्य अस्ति इति रथिन्, | द्वितीया | एकवचनम् |
| दधनि | – दधि, | सप्तमी, | एकवचनम् |
| स्रोतःसु | – स्रोतस्, | सप्तमी, | बहुवचनम् |
| आत्मनि | – आत्मन् | सप्तमी | एकवचनम् |
| तपसा | – तपस्, | तृतीया, | एकवचनम् |

**क्रियापदपरिचयः**

| | | | | |
|---|---|---|---|---|
| विद्धि | – विद्, | लोट्, | मध्यमपुरुषः | एकवचनम् |
| गृह्यते | – ग्रह् कर्मवाच्य | लट्, | प्रथमपुरुषः, | एकवचनम् |
| अनुपश्यति | – अनु + दृश् (पश्य्) | लट्, | प्रथमपुरुषः, | एकवचनम् |

**प्रत्ययः**

| | |
|---|---|
| रथिन् | – रथ + इनि (तद्धितप्रत्ययः) |

**सन्धयः**

| | | |
|---|---|---|
| दधनीव | – दधनि + इव | (दीर्घसन्धिः) |
| सर्पिरापः | – सर्पिः + आपः | (विसर्गसन्धिः) |
| स्त्रोतःस्वरणीषु | – स्रोतःसु + अरणीषु | (यण्सन्धिः) |

आत्माऽऽत्मनि – आत्मा + आत्मनि (दीर्घसन्धिः)
सत्येनैनम् – सत्येन + एनम् (वृद्धिसन्धिः)
योऽनुपश्यति – यः + अनुपश्यति (विसर्गसन्धिः)

## पाठगतप्रश्नाः 14.2

1. उभयोः स्तम्भयोः दत्तानाम् उपमेय–उपमानानाम् उचितं मेलनं कुर्वन्तु

| क स्तम्भः | ख स्तम्भः |
|---|---|
| (क) शरीरम् | (i) बुद्धिः |
| (ख) प्रग्रहम् | (ii) आत्मा |
| (ग) सारथिः | (iii) रथः |
| (घ) रथी | (iv) मनः |

2. उचितपदं चित्वा रिक्तस्थानं पूरयन्तु

अग्निः, सर्पिः, तैलम्, आत्मनि, स्रोतःसु

(क) तिलेषु ...................................

(ख) ................................... आत्मा

(ग) अरणीषु ...................................

(घ) ................................... आपः

(ङ) दधनि ...................................

3. संस्कृतभाषया उत्तरं लिखन्तु

(क) शरीररूपिणः रथस्य प्रग्रहः किम्?

(ख) आत्मनि आत्मा केन गृह्यते?

(ग) अरणीषु अग्निः कथम् उत्पाद्यते?

(घ) तिलेषु किं भवति?

(ङ) नरः सत्येन कं पश्यति?

---

## तृतीयः अंशः

**मन्त्रः– 7**

अथर्ववेदस्य मन्त्रेऽस्मिन् परिवारे स्नेहवृत्तेः विकासाय प्रार्थना क्रियते।

**पदच्छेदः–** अनुव्रतः पितुः पुत्रः मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीम् वाचम् वदतु शान्तिवाम्।।

अनुव्रतः पितुः पुत्रः
मात्रा भवतु संमनाः
जाया पत्ये मधुमतीं
वाचं वदतु शान्तिवाम्।।7।।

**अन्वयः** पुत्रः पितुः अनुव्रतः भवतु, मात्रा संमनाः भवतु। जाया पत्ये मधुमतीं शान्तिवाम् वाचम् वदतु।

**व्याख्या–**

पुत्रः किं भवतु? पितुः अनुव्रतः भवतु। अन्यत् किं भवतु? माता संमनाः

जाया कीदृशीम् वाचम् वदतु? मधुमतीम्। पुनः कीदृशीम्? शान्तिवाम्। कस्मै? पत्ये।

**अयं मन्त्रः अथर्ववेदस्य अस्ति।**

**अनुव्रतः पितुः पुत्रः** – पुत्रः पितुः अनुव्रतः– अनुकूलः स्यात्, पितुः वचनं पालयेत्, पितुः आज्ञाकारी स्यात्।

**मात्रा भवतु संमनाः–** मात्रा समानमनस्कः भवतु। यथा माता चिन्तयति तथा करोतु। पुत्रः मातुः इच्छायाः अवहेलनां न कुर्यात्।

**जाया पत्ये ..............शान्तिवाम्**

जाया–पत्नी, पत्ये –भर्त्रे, मधुमतीं–मधुरां, शान्तिवाम्–शान्तियुक्तां, शीतलां वाचं वाणीं वदतु।

**अत्र परिवारे चत्वारः जनाः वर्णिताः**–पिता, माता, पुत्रः, पुत्रस्य पत्नी। वेदमन्त्रः आदिशति यत् पुत्रः पितुः अनुकूलः स्यात्, पितरम् अनुचरेत्, पुत्रः मातुः इच्छायाः आदरं कुर्यात् सा यथा वा×छति तथा कुर्यात्। पत्नीपत्योः मध्ये कलहः मा भवतु अतः वेदमन्त्रः आदिशति यत् पत्नी पत्ये मधुरां शान्तिमयीं च वाणीं वदतु।

**मन्त्रः– 8**

मा भ्राता भ्रातरं द्विक्षन्
मा स्वसारमुत स्वसा।
सम्यंचः सव्रता भूत्वा
वाचं वदत भद्रया।।8।।

अस्मिन मन्त्रे पारिवारिकसौमनस्यं कीदृशं कामयते इति बोधामः।

**पदच्छेदः** मा भ्राता भ्रातरम् द्विक्षन्, मा स्वसारम् उत स्वसा।
सम्यंचः सव्रता भूत्वा, वाचम् वदत भद्रया।।

**अन्वयः** भ्राता भ्रातरम् मा द्विक्षत्, उत् स्वसा स्वसारम् मा (द्विक्षत्) सम्यंचः सव्रताः भूत्वा भद्रया वाचम् वदत।।

**व्याख्या**

भ्राता कं न द्विष्यात्? भ्रातरम्।

स्वसा कां न द्विष्यात्? स्वसारम्।

यूयं कि वदत? वाचं, भद्रया। कथं? सम्यंचः सव्रता भूत्वा

**मा भ्राता भ्रातरं द्विक्षत्**– भ्राता भ्रातरं प्रति द्वेषं न कुर्यात्। सहोदरं प्रति द्रोहं न करोतु। उभौ प्रेमपूर्वकं वसताम्। मा स्वसारमुतस्वसा–स्वसा–भगिनी स्वसारं– भगिनीं प्रति द्वेषं न कुर्यात्। स्वसा अन्यां स्वसारं प्रति द्रोहं न कुर्यात्। उभे प्रेम्णा निवसताम्।

**सम्यंचः सव्रता .................. वदत भद्रया।।**

**सम्यंचः**– समानगतिकाः, समानमतधारिणः, समानविचारवन्तः,

**सव्रतः**– समानकर्माणः, समानकार्यवन्तः भूत्वा भद्रया– हितपूर्णरीत्या कल्याणमय्या पद्धत्या, मधुरेण वाचं वाणीं वदत। वेदमन्त्रः आदिशति यत् यूयं सर्वे जनाः समानगतिकाः समानमतवन्तः समानकर्मकराः परस्परं मधुरया वाण्या–भाषया–गिरा व्यवहारं कुरुत। यूयं प्रेमपूर्वकं वसत।

(अथर्ववेद के ये दो मन्त्र परिवार में सुखपूर्वक शान्ति से रहने का मार्ग बताते हैं। पुत्र पिता का आज्ञाकारी हो और माँ की इच्छाओं के अनुसार व्यवहार करे। पत्नी पति से मधुर वाणी में शान्तिपूर्वक बोले।)

भाई अपने दूसरे भाई से द्वेष न करे, न ही बहन अपनी बहन से द्वेष भाव रखे। सभी लोग एक मत वाले होकर अपने अपने कर्म में लगें तथा परस्पर हितकारी वचन बोलें। इस प्रकार व्यवहार करने से न परिवार में ही झगड़ा या असन्तोष होगा और न ही समाज में।

## व्याकरणबिन्दवः

| | | |
|---|---|---|
| अनुव्रतः | – अनुगतं व्रतं येन सः बहुव्रीहिसमासः | |
| पितुः | – पितृ, पंचमी, | एकवचनम् |
| मात्रा | – मातृ, तृतीया, | एकवचनम् |
| पत्ये | – पति, चतुर्थी | एकवचनम् |
| वाचम् | – वाच्, द्वितीया | एकवचनम् |
| भ्रातरम् | – भ्रातृ, द्वितीया | एकवचनम् |
| स्वसारम् | – स्वसृ द्वितीया | एकवचनम् |

### शब्दरूपाणि

| | ज्योतिष् (नपुंसकलिंगम्) | | | सरस् नपुंसकलिंगम् | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्र० वि०: | ज्योतिः | ज्योतिषी | ज्योतींषि | सरः | सरसी | सरांसि |
| द्वि० वि०: | ज्योतिः | ज्योतिषी | ज्योतींषि | सरः | सरसी | सरांसि |
| तृ० वि०: | ज्यातिषा | ज्योतिर्भ्याम् | ज्योतिर्भिः | सरसा | सरोभ्याम् | सरोभिः |
| च० वि०: | ज्योतिषे | ज्योतिर्भ्याम् | ज्येतिर्भ्यः | सरसे | सरोभ्याम् | सरोभ्यः |
| पं० वि०: | ज्योतिषः | ज्योतिर्भ्याम् | ज्योतिर्भ्यः | सरसः | सरोभ्याम् | सरोभ्यः |
| ष० वि०: | ज्योतिषः | ज्योतिषोः | ज्योतिषाम् | सरसः | सरसोः | सरसाम् |
| स० वि०: | ज्योतिषि | ज्योतिषोः | ज्योतिषु | सरसि | सरसोः | सरस्सु |
| सम्बोधनम् | हे ज्योतिः | हे ज्योतिषी | हे ज्योतींषि | हे सरः | हे सरसी | हे सरांसि |



| | आत्मन् (पुल्लिंग) | | | पितृ | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्र० वि०: | आत्मा | आत्मानौ | आत्मानः | पिता | पितरौ | पितरः |
| द्वि० वि०: | आत्मानम् | आत्मानौ | आत्मनः | पितरम् | पितरौ | पितॄन् |
| तृ० वि०: | आत्मना | आत्मभ्याम् | आत्मभिः | पित्रा | पितृभ्याम् | पितृभिः |
| च० वि०: | आत्मने | आत्मभ्याम् | आत्मभ्यः | पित्रे | पितृभ्याम् | पितृभ्यः |
| पं० वि०: | आत्मनः | आत्मभ्याम् | आत्मभ्यः | पितुः | पितृभ्याम् | पितृभ्यः |
| ष० वि०: | आत्मनः | आत्मनोः | आत्मनाम् | पितुः | पित्रोः | पितॄणाम् |
| स० वि०: | आत्मनि | आत्मनोः | आत्मसु | पितरि | पित्रोः | पितृषु |
| सम्बोधनम् | हे आत्मन् | हे आत्मानौ | हे आत्मानः | हे पितः | हे पितरौ | हे पितरः |

भ्रातृ,जामातृ देवृ शब्दानां रूपाणि पितृवत् भवन्ति

### मातृ

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमाविभक्तिः | माता | मातरौ | मातरः |
| द्वितीयाविभक्तिः | मातरम् | मातरौ | मातॄः |

अन्यासु विभक्तिषु रूपाणि पितृवत् भवन्ति। दुहितृ (पुत्री) शब्दस्य रूपाणि मातृवत् भवन्ति।

### दातृ

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा वि. | दाता | दातारौ | दातारः |
| द्वितीया वि. | दातारम् | दातारौ | दातॄन् |

अन्यासु विभक्तिषु रूपाणि पितृवत् भवन्ति।

| | राजन् (पुंल्लिङ्गम्) | | | पति (पुंल्लिङ्गम्) | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्र० वि०: | राजा | राजानौ | राजानः | पतिः | पती | पतयः |
| द्वि० वि०: | राजानम् | राजानौ | राजानः | पतिम् | पती | पतीन् |
| तृ० वि०: | राज्ञा | राजभ्याम् | राजभिः | पत्या | पतिभ्याम् | पतिभिः |
| च० वि०: | राज्ञे | राजभ्याम् | राजभ्यः | पत्ये | पतिभ्याम् | पतिभिः |
| पं० वि०: | राज्ञः | राजभ्याम् | राजभ्यः | पत्ये | पतिभ्याम् | पतिभ्यः |
| ष० वि०: | राज्ञः | राज्ञोः | राज्ञाम् | पत्युः | पत्योः | पतीनाम् |
| स० वि०: | राज्ञि/राजनि | राज्ञोः | राजसु | पत्यौ | पत्योः | पतिषु |
| सम्बोधनम् | हे राजन्! | हे राजानौ! | हे राजानः। | हे पते! | हे पती! | हे पतयः! |





| | मनस् (नपुं. लिङ्गम्) | | | चन्द्रमस् (पुंल्लिङ्गम्) | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्र० वि०: | मनः | मनसी | मनांसि | चन्द्रमाः | चन्द्रमसौ | चन्द्रमसः |
| द्वि० वि०: | मनः | मनसी | मनांसि | चन्द्रमसम् | चन्द्रमसौ | चन्द्रमसः |
| तृ० वि०: | मनसा | मनोभ्याम् | मनोभिः | चन्द्रमसा | चन्द्रमोभ्याम् | चन्द्रमोभिः |
| च० वि०: | मनसे | मनोभ्याम् | मनोभ्यः | चन्द्रमसे | चन्द्रमोभ्याम् | चन्द्रमोभ्यः |
| पं० वि०: | मनसः | मनोभ्याम् | मनोभ्यः | चन्द्रमसः | चन्द्रमोभ्याम् | चन्द्रमोभ्यः |
| ष० वि०: | मनसः | मनसोः | मनसाम् | चन्द्रमसः | चन्द्रमसोः | चन्द्रमसाम् |
| स० वि०: | मनसि | मनसोः | मनःसु/ मनस्सु | चन्द्रमसि | चन्द्रमसोः | चन्द्रमः सु/ चन्द्रमस्सु |
| सम्बोधनम् | मनः | मनसी | मनांसि | हे चन्द्रमः! | हे चन्द्रमसौ! | हे चन्द्रमसः! |

## पाठगतप्रश्नाः 14.3

1. उचितपदचयनेन रिक्तस्थानपूर्तिः विधेया
   पुत्रः, पत्ये, संमना, शान्तिवाम्, वाचं
   (क) पुत्रः मात्रा .......................... भवतु।
   (ख) जाया पत्ये ..........................वाचं वदतु।
   (ग) ..........................पितुः अनुव्रतः भवतु।
   (घ) भद्रया .......................... वदत।
   (ङ) जाया .......................... मधुमतीं वाचं वदतु।

2. चतुर्भ्यः स्तम्भेभ्यः पदानि चित्वा दश वाक्यानि लिखन्तु

| | | | |
|---|---|---|---|
| भ्राता | स्वसारम् | मा | द्विष्यात् |
| स्वसा | भ्रातरम् | | |
| पुत्रः | पितुः | अनुव्रतः | |
| सम्यंचः | मातुः | | |
| सव्रताः | पित्रा | संमनाः | भवतु |
| | मात्रा | | |
| | भूत्वा | वाचं | वदत |

3. परिवारे सौमनस्यार्थं पुत्रः, जाया, भ्राता स्वसा च किं कुर्युः इति विषये षड् वाक्यानि लिखन्तु–
   (क) ..........................
   (ख) ..........................

(ग) ..........................

(घ) ..........................

(ङ) ..........................

(च) ..........................

## 14.4 किम् अधिगतम्

- ब्रह्म, द्यौः, इन्द्र, गौः, सृष्टौ विशिष्टाः सन्ति।
- सोमः मनुष्याणां कल्याणं करोति।
- शरीरं रथम् अस्ति आत्मा तस्य स्वामी रथी अस्ति।
- आत्मा आत्मनि एव वर्तते बहिः न विद्यते।
- श्रोत्रादीनाम् इन्द्रियाणां चेतनत्वम् आत्मनः एव भवति।
- अस्माभिः परिवारे परस्परं प्रेमभावनया स्थातव्यम्।
- द्वयोः मध्ये तुलनायाम् ईयसुन् प्रत्ययः, एकस्य बहुभिः तुलनायां इष्ठन् प्रत्ययः प्रयुज्यते।
- 'विद्' धातोः रूपाणि आत्मनेपदे भवन्ति।

## 14.5 योग्यताविस्तारः

संस्कृतस्य वाङ्‌मयम् अति समृद्धम् अस्ति। वेदाः चत्वारः सन्ति– ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः च। वेदांगानि षट् सन्ति– शिक्षा, व्याकरणम्, छन्दः, कल्पः, निरुक्तं ज्योतिषं च। प्रमुखाः एकादश उपनिषदः सन्ति–ईश–केन–कठ–प्रश्न–मुण्डक–मांडूक्य–ऐतरेय–तैत्तिरीय–छान्दोग्य, बृहदारण्यक–श्वेताश्वतराः। रामायणं महाभारतं च महाकाव्ये स्तः।

### मन्त्राणां सन्दर्भाः

- यजुर्वेदे चत्वारिंशत् अध्यायाः सन्ति। प्रस्तुतपाठे प्रथमौ द्वौ मन्त्रौ यजुर्वेदस्य स्तः 1. (यजुर्वेदः अध्यायः–3 मन्त्रः 47), 2. (यजुर्वेदः अध्यायः–23 मन्त्रः 48)।
- तृतीयः मन्त्रः सामवेदस्य अस्तिः। सामवेदे मन्त्राणां गायनं भवति। अतः ऋग्वेदस्य अनेके मन्त्राः सामवेदे अपि सन्ति। उत्तरार्चिकम् अध्याय 9 खण्ड 1 मन्त्रः 1।





- चतुर्थः, पंचमः, षष्ठः, एते मन्त्राः उपनिषद्भ्यः गृहीताः।
  1. प्रश्नोपनिषद् 1.8
  2. कठोपनिषद् 1.3.3
  3. श्वेताश्वतरोपनिषद् 1. 15
- उपनिषत्सु आत्मनः परमात्मनः विषये चिन्तनं वर्तते। एते ग्रंथाः वेदान्तदर्शनस्य आधारभूताः सन्ति।
- पाठस्य सप्तमः अष्टमः च मन्त्रौ अथर्ववेदस्य स्तः। यत्र परिवारस्य सुखरीतिः उक्ता।

  अथर्ववेदः 3.30.4

  अथर्ववेदः 3.30.3

अथर्ववेदे ब्रह्मज्ञानस्य लौकिकव्यवहारस्य च अनेके विषयाः वर्णिताः सन्ति।

## भावविस्तारः

वेद विश्व के सर्वप्रथम ग्रंथ हैं। इनमें मनुष्य के चिन्तन और जिज्ञासा के अभिलेख हैं। सूर्य, समुद्र पृथिवी की विशेषताओं को देखकर मनुष्य के मन में जिज्ञासा होना स्वाभाविक है। जिज्ञासा के भौतिक प्रश्नों के आध्यात्मिक उत्तर पाकर मनुष्य सृष्टि के स्वरूप और उसके रहस्यों को समझ सकता है। ब्रह्म, द्युलोक और इन्द्र के स्वरूप को समझने के लिए पाठ में दिए गए मन्त्र अति महत्त्वपूर्ण हैं। गौ का महत्त्व इसमें अच्छी तरह बताया गया है कि गौ के गुणों की कोई बराबरी नहीं हैं। अग्नि, सोम, और सूर्य मनुष्यों के कल्याण के लिए हैं। मनुष्य इन से शक्ति और प्रेरणा पाकर कल्याण मार्ग पर अग्रसर होता है।

उपनिषदों में उच्चस्तरीय आध्यात्मिक चिन्तन किया गया है। मनुष्य के अस्तित्व के वास्तविक रूप को समझने में उपनिषद् ग्रंथ बहुत सहायक होते हैं। शरीर केवल रथ के समान है जिसका सारथि आत्मा है। आत्मा ही वस्तुतः स्वामी है। बुद्धि इस रथ को चलाने वाली है वह सारथि के समान है। मन लगाम है। अतः शरीर रूपी रथ को यदि नियन्त्रण में रखना है तो मन को काबू में रखना आवश्यक है। मन को सन्मार्ग पर लगाना चाहिए। जिस प्रकार तिलों में तेल होता है और दही में घी होता है वैसे ही मनुष्य की आत्मा उसके अन्दर होती है। जैसे तिलों से तेल और दही से घी निकालने में परिश्रम करना पड़ता है वैसे ही आत्मा को पहचानने के लिए भी सत्य और तप का आचरण करना पड़ता है।

परिवार की सफलता के लिए यह बहुत आवश्यक है पुत्र, पुत्रियां, माता–पिता एक दूसरे से मधुर व्यवहार करें। भाई बहनों में परस्पर प्रगाढ़ प्रेम हो तथा वे एक दूसरे के प्रति द्वेष न करें। कोई किसी के विरुद्ध आचरण न करे तथा परस्पर मधुर वाणी से व्यवहार करे। परिवार में यदि शान्ति और सुख है तो समाज एवं राष्ट्र में शान्ति होगी और इससे समृद्धि आयेगी। शान्ति और सन्तोष ही सबसे बड़ी समृद्धि हैं।

## भाषाविस्तार:

### व्यंजनसन्धि:

'पतन्ति परपीडका:' इति पाठे भवद्भिः व्यंजनसन्धिविषये पठितम्। इदानीम् अत्र व्यंजनसन्धेः विसर्गसन्धेः च उदाहरणानि दीयन्ते।

| | | | | |
|---|---|---|---|---|
| सत् | + | जन: | = | सज्जन: |
| तत् | + | लीन: | = | तल्लीन: |
| वाक् | + | ईश: | = | वागीश: |
| कृष्णम् | + | वन्दे | = | कृष्णं वन्दे |
| वाक् | + | मयम् | = | वाङ्मयम् |
| तस्मिन् | + | एव | = | तस्मिन्नेव |

### विसर्ग–सन्धि:

विसर्गात् परे स्वरे व्यंजने वा सति तयो: मेलनेन विसर्गे यत् परिवर्तनं भवति असौ विसर्गसन्धि: भवति।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| गुरो: | + | आज्ञा | = | गुरोराज्ञा | राम: | + | तिष्ठति | = | रामस्तिष्ठति |
| यश: | + | काय: | = | यशस्काय: | क: | + | अयम् | = | कोऽयम् |
| बाल: | + | गच्छति | = | बालो गच्छति | देवा: | + | वन्दनीया: | = | देवा वन्दनीया: |
| स: | + | पठति | = | स पठति | | | | | |

## 14.6 पाठान्तप्रश्ना:

1. क स्तम्भस्य ख स्तम्भेन सह मेलनं कुर्वन्तु

| 'क' स्तम्भ: | 'ख' स्तम्भ: |
|---|---|
| (क) आत्मानं | (i) गो: |
| (ख) सूर्यसमं ज्योति: | (ii) सर्पि: |
| (ग) मात्रा न विद्यते | (iii) पितु: अनुव्रत: |
| (घ) दधनि | (iv) रथिनं विद्धि |
| (ङ) पुत्र: | (v) ब्रह्म |

2. समासविग्रहं कुर्वन्तु

   (i) सूर्यसमम् ............................................................

   (ii) समुद्रसमम् ............................................................

(iii) सहस्ररश्मिः ..........................................................

(iv) अनुव्रतः ..........................................................

(v) संमनाः ..........................................................

3. संस्कृतेन उत्तराणि लिखन्तु

(क) पृथिव्यै वर्षीयान् कः?

(ख) ब्रह्मविदः कं ज्ञातवन्तः?

(ग) सोमः कस्मै कस्मै कल्याणं करोतु?

(घ) पारिवारिकाः जनाः किं भूत्वा भद्रां वाचं वदन्तु?

(ङ) आत्मनि आत्मानं को जानाति?

4. सूर्यस्य स्वरूपं पञ्चवाक्येषु वर्णयन्तु।

5. 'शरीरं रथमस्ति' इति विषये वाक्यचतुष्टयं लिखन्तु।

6. अधोलिखितानां पदानां परिचयं लिखन्तु

| | प्रातिपदिकम् | विभक्तिः | वचनम् |
|---|---|---|---|
| (i) राजभिः | ...................... | ...................... | ...................... |
| (ii) राजसु | ...................... | ...................... | ...................... |
| (iii) पत्ये | ...................... | ...................... | ...................... |
| (iv) पतीनाम् | ...................... | ...................... | ...................... |
| (v) मनसि | ...................... | ...................... | ...................... |
| (vi) मनोभ्यः | ...................... | ...................... | ...................... |
| (vii) चन्द्रमसौ | ...................... | ...................... | ...................... |
| (viii) चन्द्रमसः | ...................... | ...................... | ...................... |
| (ix) आत्मानौ | ...................... | ...................... | ...................... |
| (x) आत्मनोः | ...................... | ...................... | ...................... |
| (xi) पित्रा | ...................... | ...................... | ...................... |
| (xii) पितृभ्याम् | ...................... | ...................... | ...................... |

## 14.7 उत्तराणि

**14.2 बोधप्रश्नाः**

1. क. सूर्यसमं, ख. मात्रा, ग. रथिनं, घ. अनुव्रतः, ङ. भद्रया

2. क–(iii), ख–(iv), ग–(i), घ–(v), ङ–(ii),

**पाठगतप्रश्नाः**

**14.1** 1. (क) कस्य मात्रा न विद्यते?

(ख) किंस्वित् समुद्रसमं सरः?

(ग) किंस्वित् पृथिव्यै वर्षीयान्?

(घ) किंस्वित् सूर्यसमं ज्योतिः?

2. (क) ब्रहविदः सूर्यं विश्वरूपं, हरिणं, जातवेदसं परायणं ज्योतिः एकं तपन्तम् ज्ञातवन्तः।

(ख) 'अर्वते' शब्दस्य अर्थः 'अश्वाय' इति

(ग) सोमः गवे, अश्वाय, ओषधिभ्यः च कल्याणं करोति।

(घ) पृथिव्यै वर्षीयान् इन्द्रः अस्ति।

(ङ) नः इति पदस्य अर्थः 'अस्माकम्' अस्ति।

3. (क) प्रेयान् (ख) श्रेष्ठः (ग) वरीयान् (घ) नेदिष्ठः (ङ) कनिष्ठः

**14.2** 1. (क) iii, (ख) iv, (ग) i, (घ) ii

2. क. तैलम् ,ख. आत्मनि, ग. अग्निः, घ स्रोतःसु, ङ सर्पिः,

3. (क) शरीररूपिणः रथस्य प्रग्रहः मनः अस्ति।

(ख) आत्मनि आत्मा सत्येन तपसा च गृह्यते।

(ग) अरणिषु अग्निः घर्षणेन उत्पाद्यते।

(घ) तिलेषु तैलम् भवति।

(ङ) नरः सत्येन आत्मानं पश्चति।

**14.3** 1. (क) संमना (ख) शान्तिवाम् (ग) पुत्रः (घ) वाचं (ड.) पत्ये

2. (1) भ्राता स्वसारं मा द्विष्यात्। (2) भ्राता भ्रातरं मा द्विष्यात्।

(3) स्वसा स्वसारं मा द्विष्यात्। (4) स्वसा भ्रातरं मा द्विष्यात्।

(5) पुत्रः पितुः अनुव्रतः भवतु। (6) पुत्रः मातुः अनुव्रतः भवतु।

(7) पुत्रः पित्रा संमनाः भवेत्। (8) पुत्रः मात्रा संमनाः भवेत्।

(9) सम्यंचः भूत्वा वाचं वदत। (10) सव्रता भूत्वा वाचं वदत।

3. (क) पुत्रः पितुः अनुव्रतः भवतु। (ख) पुत्रः मात्रा संमनाः भवेत्।

(ग) भ्राता भ्रातरं मा द्विष्यात्। (घ) स्वसा स्वसारं मा द्विष्यात्।

(ङ) सम्यंचः सव्रताः भूत्वा भद्रया वाचं वदन्तु।

(च) जाया पत्ये मधुमतीं वाचं वदेत्।

**14.6 पाठान्तप्रश्नाः**

1. (क) iv, (ख) v, (ग) i, (घ) ii, (ङ) iii

2. (i) सूर्येण समम्, (ii) समुद्रेण समम्, (iii) सहस्रं रश्मयः यस्य सः, (iv) अनुगतं व्रतं यस्य सः, (v) संगतं मनः यस्य सः।

3. (क) पृथिव्यै इन्द्रः वर्षीयान् अस्ति।

   (ख) ब्रह्मविदः सूर्यं ज्ञातवन्तः।

   (ग) सोमः गोभ्यः अश्वेभ्यः ओषधिम्यः कल्याणं करोतु।

   (घ) पारिवारिकजनाः सम्यंचः सव्रताः भूत्वा भद्रां वाचं वदन्तु।

   (ङ) यः सत्येन तपसा व्यवहरति सः आत्मनि आत्मानं जानाति।

4. यथेच्छं सूर्यविषये पञ्चवाक्यानि रचयन्तु।

5. पञ्चममंत्रानुसारं वाक्यचतुष्टयं रचयन्तु।

6. (i) राजन् – तृतीया विभक्तिः, बहुवचनम्

   (ii) राजन् – स. वि., ब.व.

   (iii) पति – च. वि., ए. व.

   (iv) पति – ष. वि., ब. व.

   (v) मनस् – स. वि, ए. व.

   (vi) मनस् – च./पं. वि., ब. व.

   (vii) चन्द्रमस् – प्र./द्वि. वि., द्वि. व.

   (viii) चन्द्रमस् – पं./ष. वि., ए. व.

   (ix) आत्मन् – प्र. वि., द्वि. व.

   (x) आत्मन् – पं. ष. वि. द्वि0 व.

   (xi) पितृ – तृ. वि. ए. व.

   (xii) पितृ – तृ. च. पं. वि. बहुवचनम्